प्रवेश सं० — म०म०श्रा०सं० ३४५३५ विषयः वेद क्रम सं० —

नाम ऋक् संहिता (जटापाठः) ग्रन्थकार —

पत्र सं० ४८–पूर्ण

श्लोक सं० — अक्षर सं० (पंक्तौ) 39 पंक्ति सं० (पृष्ठे) ✓

आकारः ८.२×४ लिपिः दे.ना. आधारः का.

वि० विवरणम् —

000095

जी० एस० यू० पी०—७७ एस० सी० ई०—१९५१—५० ०००

ग. १० / २५

Indira Gandhi National Centre for the Arts

रुक्मिणो दिवि तारा न रोचंते॥ मह्ना दिवं न तस्तभुः॥ शतं वेणूंछतं शुनः शतं चर्म्मा
णि म्लातानि॥ शतं मे बल्बजस्तुकाऽअरुषीणां चतुःशतं॥ सुदेवाः स्थ काण्वा
यना वयोवयो विचरंतः॥ अश्वासो न चंक्रमत॥ आदित्साप्तस्य चर्क्किरन्ना
नूनस्य महि श्रवः॥ श्यावीरतिध्वसन्पथश्चक्षुषा चन संनशे॥ २५॥ प्रति ते द
स्यवे वृक राधोऽअदर्श्यह्रयं॥ द्यौर्न्न प्रथिना शवः॥ दश मह्यं पौतक्रतः सह
स्रा दस्यवे वृकः॥ नित्याद्रायोऽअमंहत॥ शतं मे गर्द्दभानां शतमूर्णावती
नां॥ शतं दासांऽअति स्रजः॥ तत्रोऽअपि प्राणीयत पूतक्रतायै व्यक्ता॥
अश्वानामिन्न यूथ्यां॥ अचेत्यग्निश्चिकितुर्हव्यवाट् स सुमद्रथः॥ अग्निः
शुक्रेण शोचिषा बृहत्सूरोऽअरोचत दिवि सूर्य्योऽअरोचत॥ २७॥ युवं दे

Indira Gandhi National
Centre for the Arts

सं·प·

५१ वा॒ क्रतु॑ना पू॒र्व्ये॑ण यु॒क्ता रथे॑न त॒वि॒षं य॑जत्रा ॥ आ ग॑च्छतं नासत्या॒ शची॑भिरि॒
दं तृ॒तीयं॒ सव॑नं पिबाथः ॥ यु॒वां दे॒वास्त्रय॑ऽएकाद॒शासः॑ स॒त्याः स॒त्यस्य॑ द
दृशे पु॒रस्ता॑त् ॥ अ॒स्माकं॑ य॒ज्ञं सव॑नं जुषा॒णा पा॒तं सोम॑मश्विना॒ दीद्य॑ग्नी ॥
प॒नाय्यं॒ तद॑श्विना कृ॒तं वां॑ वृष॒भो दि॒वो रज॑सः पृथि॒व्याः ॥ स॒हस्रं॒ शंसा॑ऽउ॒त ये
ग॒विष्टौ॒ सर्वाँ॒२ऽइत्ताँ२ऽउप॑ याता॒ पिब॑ध्यै ॥ अ॒यं वां॑ भा॒गो निहि॑तो यजत्रे॒मा गिरो॑ ना
स॒त्योप॑ यातम् ॥ पिब॑तं॒ सोमं॒ मधु॑मन्तम॒स्मे प्र दा॒श्वांस॑मवतं॒ शची॑भिः ॥२८॥
यमृ॒त्विजो॑ बहु॒धा क॒ल्पय॑न्तः॒ सचे॑तसो य॒ज्ञमि॒मं वह॑न्ति ॥ यो॑ऽअनूचा॒नो ब्रा॑ह्म॒
णो यु॒क्तऽआसी॒त्का स्वि॒त्तत्र॒ यज॑मानस्य सं॒वित् ॥ एक॑ऽए॒वाग्निर्ब॑हु॒धा समि॑द्ध॒
एकः॒ सूर्यो॒ विश्व॒मनु॒ प्रभू॑तः ॥ एकै॒वोषाः सर्व॑मि॒दं वि भा॒त्येकं॒ वाऽइ॒दं वि ब॑भू ५०

व॒ सर्व॑म् ॥ ज्योति॑ष्मन्तं के॒तुम॑न्तं त्रिच॒क्रं सु॒खं रथं॑ सु॒षदं॒ भूरि॑वारम् ॥ चि॒त्राम॑घा॒ यस्य॒
योगे॑ऽधिज॒ज्ञे तं वां॑ हुवे॒ऽअति॑ रिक्तं॒ पिब॑ध्यै ॥२९॥ इ॒मानि॑ वां भाग॒धेया॑नि सिस्र
त॒ऽइन्द्रा॑वरुणा॒ प्र म॒हे सु॒तेषु॑ वाम् ॥ य॒ज्ञेय॑ज्ञे ह॒ सव॑ना भुर॒ण्यथो॒ यत्सु॒न्वते॒ यज॑
मानाय॒ शिक्ष॑थः ॥ नि॒ष्षि॒ध्वरी॒रोष॑धी॒राप॑ऽआस्ता॒मिन्द्रा॑वरुणा महि॒मान॒
माश॑त ॥ या सि॒स्रतू॒ रज॑सः पा॒रेऽअध्व॑नो॒ ययोः॒ शत्रु॒र्नकि॒राद॑देव॒ऽओह॑
ते ॥ स॒त्यं तदि॑न्द्रावरुणा कृ॒शस्य॑ वा॒म्मध्व॑ऽऊ॒र्मिं दु॑हते स॒प्त वाणीः॑ ॥ ताभि॑
र्दा॒श्वांस॑मवतं शुभस्पती॒ यो वा॒मद॑ब्धो॒ऽअ॒भि पाति॒ चित्ति॑भिः ॥ घृ॒त॒प्रुषः॒ सौ
म्या॒ जी॒रदा॑नवः स॒प्त स्वसा॑रः॒ सद॑न॒ऽऋ॒तस्य॑ ॥ या ह॑ वामिन्द्रावरुणा घृत॒
श्चुत॒स्ताभि॑र्धत्तं॒ यज॑मानाय शिक्षतम् ॥३०॥ अवो॑चाम म॒हते॒ सौभ॑गाय स॒त्यं

Indira Gandhi National
Centre for the Arts

सं·प·
५० वृषभ्यां महिमानमिंद्रियं ॥ अस्मान्त्स्विंद्रावरुणा घृतश्चुतस्त्रिभिः साप्तेभिर
वतं शुभस्पती ॥ इंद्रावरुणा यदृषिभ्यो मनीषां वाचो मतिं श्रुतमदत्तमग्रे ॥ यानि
स्थानान्यसृजंत धीरा यज्ञं तन्वानास्तपसाभ्यपश्यं ॥ इंद्रावरुणा सौमनसमदृ
प्तं रायस्पोषं यजमानेषु धत्तं ॥ प्रजां पुष्टिं भूतिमस्मासु धत्तं दीर्घायुत्वाय प्रति
रतं न आयुः ॥ ३१ ॥ इति वालखिल्याः ॥ अग्न आ याह्यग्निभिर्होतारं त्वा वृणीम
हे ॥ आ त्वामनक्तु प्रयता हविष्मती यजिष्ठं बर्हिरासदे ॥ अच्छा हि त्वा सहसः सू
नो अंगिरः स्रुचश्चरंत्यध्वरे ॥ ऊर्जो नपातं घृतकेशमीमहेऽग्निं यज्ञेषु
पूर्व्यं ॥ अग्ने कविर्वेधा असि होता पावक यक्ष्यः ॥ मंद्रो यजिष्ठो अध्वरे
ष्वीड्यो विप्रेभिः शुक्र मन्मभिः ॥ अद्रोघमा वहोशतो यविष्ठ्य देवाँ अज ५०

स्र वीतये ॥ अभि प्रयांसि सुधितावसो गहि मंदस्व धीतिभिर्हितः ॥ त्वमित्सप्रथा अस्य
ग्ने त्रातर्ऋतस्कविः ॥ त्वां विप्रासः समिधान दीदिव आ विवासंति वेधसः ॥
॥ ३२ ॥ शोचा शोचिष्ठ दीदिहि विशे मयो रास्व स्तोत्रे महाँ असि ॥ देवानां शर्मन्
न्मम संतु सूरयः शत्रूषाहः स्वग्नयः ॥ यथा चिद्वृद्धमतसमग्ने संजूर्वसि क्षमि ॥
एवा दह मित्रमहो यो अस्मध्रुग्दुर्मन्मा कश्च वेनति ॥ मा नो मर्ताय रिपवे रक्ष
स्विने माघशंसाय रीरधः ॥ अस्रेधद्भिस्तरणिभिर्यविष्ठ्य शिवेभिः पाहि पा
युभिः ॥ पाहि नो अग्न एकया पाह्युत द्वितीयया ॥ पाहि गीर्भिस्तिसृभिरू
र्जां पते पाहि चतसृभिर्वसो ॥ पाहि विश्वस्माद्रक्षसो अराव्णः प्र स्म वाजे
षु नोऽव ॥ त्वामिद्धि नेदिष्ठं देवतातय आपिं नक्षामहे वृधे ॥ ३३ ॥ आ नोऽ

Indira Gandhi National
Centre for the Arts

सं·पं·
५१

अग्ने वयो वृधं रयिं पावक शंस्यं ॥ रास्वा च न ऽउपमाते पुरुस्पृहं सुनीती स्वय
शस्तरं ॥ येन वंसाम पृतनासु शर्द्धतस्तरंतो ऽअर्य्य ऽआदिशः ॥ स त्वं नो वर्द्ध
प्रयसा शचीवसो जिन्वा धियो वसुविदः ॥ शिशानो वृषभो यथाग्निः शृंगे द
विध्वत् ॥ तिग्मा ऽअस्य हनवो न प्रतिधृषे सुजंभः सहसो यहुः ॥ नहि ते ऽअ
ग्ने वृषभ प्रतिधृषे जंभासो यद्वितिष्ठसे ॥ स त्वन्नो होतः सुहुतं हविष्कृधि वं
स्वा नो वार्य्या पुरु ॥ शेषे वनेषु मात्रोः सं त्वा मर्त्तास ऽइंधते ॥ अतंद्रो हव्या व
हसि हविष्कृत ऽआदिद्देवेषु राजसि ॥ ३५ ॥ सप्त होतारस्तमिदीळते त्वाग्ने सु
त्यजमह्रयम् ॥ भिनत्स्यद्रिं तपसा विशोचिषा प्राग्ने तिष्ठ जनाँ ऽअति ॥ अ
ग्निमग्निं वो ऽअध्रिगुं हुवेम वृक्तबर्हिषः ॥ अग्निं हितप्रयसः शश्वती ५१

षा होतारं चर्षणीनां ॥ केतेन शर्म्मन्त्सचते सुषामण्यग्ने तुभ्यं चिकित्वना ॥ इ
षण्यया नः पुरुरूपमाभर वाजं नेदिष्ठमूतये ॥ अग्ने जरितर्विश्पतिस्तेपानो
देव रक्षसः ॥ अप्रोषिवान् गृहपतिर्महाँ ऽअसि दिवस्पायुर्दुरोणयुः ॥ मा नो
रक्ष ऽआवेशीदाघृणीवसो मा यातुर्यातुमावतां ॥ परोगव्यूत्यनिरामप क्षु
धमग्ने सेध रक्षस्विनः ॥ ३६ ॥ उभयं शृणवच्च न ऽइंद्रो ऽअर्वागिदं वचः ॥
सत्राच्या मघवा सोमपीतये धिया शविष्ठ ऽआगमत् ॥ तं हि स्वराजं वृषभं
तमोजसे धिषणे निष्टतक्षतुः ॥ उतोपमानां प्रथमो निषीदसि सोमकामं
हि ते मनः ॥ आ वृषस्व पुरूवसो सुतस्येंद्रांधसः ॥ विद्मा हि त्वा हरिवः
पृत्सु सासहिमधृष्टं चिद्दधृष्वणिं ॥ अप्रामिसत्य मघवंतथेदसदिंद्र क्र

Indira Gandhi National
Centre for the Arts

त्वाया यथावशः॥ सनेम वाजं तव शिप्रिन्नवसा मक्षू चिद्यन्तोऽअद्रिवः॥ श
ग्ध्यू३षु शचीपतऽइन्द्र विश्वाभिरूतिभिः॥ भगं न हि त्वा यशसं वसुविदम
नु शूर चरामसि॥३६॥ पौरोऽअश्वस्य पुरुकृद्गवामस्युत्सो देव हिरण्य
यः॥ नकिर्हि दानं परिमर्धिषत्त्वे यद्यद्यामि तदा भर॥ त्वं ह्येहि चेरवे वि
दा भगं वसुत्तये॥ उद्वावृषस्व मघवन्गविष्टयऽउदिन्द्राश्वमिष्टये॥ त्वं पुरू
सहस्राणि शतानि च यूथा दानाय मंहसे॥ आ पुरंदरं चकृम विप्रवचसऽ
इन्द्रं गायन्तोऽवसे॥ अविप्रो वा यदविधद्विप्रो वेन्द्र ते वचः॥ स प्र ममन्दत्त्वा
या शतक्रतो प्राचामन्यो अहंसन॥ उग्रबाहुर्म्रक्षकृत्वा पुरंदरो यदि
मे शृणवद्धवं॥ वसूयवो वसुपतिं शतक्रतुं स्तोमैरिन्द्रं हवामहे॥३७॥ ५२

न पापासो मनामहे नारायासो न जल्हवः॥ यदिन्न्विन्द्रं वृषणं सचा सुते स
खायं कृणवामहै॥ उग्रं युयुज्म पृतनासु सासहिमृणकातिमदाभ्यं॥ वे
दा भृमश्चित्सनिता रथीतमो वाजिनं यमिदू नशत्॥ यतऽइन्द्र भयामहे ततो नोऽ
अभयं कृधि॥ मघवञ्छग्धि तव तन्नऽऊतिभिर्वि द्विषो वि मृधो जहि॥ त्वं
हि राधस्पते राधसो महः क्षयस्यासि विधर्तः॥ तं त्वा वयं मघवन्निन्द्र गिर्व
णः सुतावन्तो हवामहे॥ इन्द्रः स्पळुत वृत्रहा परस्पा नो वरेण्यः॥ स नो
रक्षिषच्चरमं स मध्यमं स पश्चात्पातु नः पुरः॥३८॥ त्वं नः पश्चादधरादुत्त
रात्पुरऽइन्द्र नि पाहि विश्वतः॥ आरेऽअस्मत्कृणुहि दैव्यं भयमारे हेतीरदे
श्व वीः॥ अद्याद्याश्वः इन्द्र त्रास्व परे च नः॥ विश्वा च नो जरितॄन्सत्पतेऽअ

Indira Gandhi National
Centre for the Arts

सं॰ ष॰ हा दिवा न कं चर॰ ॰ ॥ प्र भंगी शूरो मघवा तुवीमघः संमिश्लो वीर्याय कं॥
५३ उभा ते बाहू वृषणा शतक्रतो नि या वज्रं मिमिक्षतुः॥६९॥ प्राऽअस्माऽउप
स्तुतिं भरता यज्जुजोषति॥ उक्थैरिंद्रस्य माहिनं वयो वर्द्धंति सोमिनो भद्राऽ
इंद्रस्य रातयः॥ अयुजोऽअसमो नृभिरेकः कृष्टीरयास्यः॥ पूर्वीरति प्रवा
वृधे विश्वा जातान्योजसा भद्राऽइंद्रस्य रातयः॥ अहितेन चिदर्वता जीरदा
नुः सिषासति॥ प्रवाच्यमिंद्र तत्तव वीर्याणि करिष्यतो भद्राऽइंद्रस्य रातयः॥
आ याहि कृणवाम तऽइंद्र ब्रह्माणि वर्द्धना॥ येभिः शविष्ठ चाकनो भद्रमिह
श्रवस्यते भद्राऽइंद्रस्य रातयः॥ धृषतश्चिद्धृषन्मनः कृणोषीद्र यत्त्वं॥
तीव्रैः सोमैः सपर्यतो नमोभिः प्रतिभूषतो भद्राऽइंद्रस्य रातयः॥ अवचष्टऽ ५३

ऋचीषमो वृतांऽइव मानुषः॥ जुष्टी दक्षस्य सोमिनः सखायं कृणुते युजं भद्राऽइंद्र
स्य रातयः॥७०॥ विश्वेतऽइंद्र वीर्यं देवाऽअनु क्रतुं ददुः॥ भुवो विश्वस्य गोपतिः
पुरुष्टुत भद्राऽइंद्रस्य रातयः॥ गृणे तदिंद्र ते शवऽउपमं देवतातये॥ यद्धंसि वृ
त्रमोजसा शचीपते भद्राऽइंद्रस्य रातयः॥ समनेव वपुष्यतः कृणवन्मानुषा
युगा॥ विदे तदिंद्रश्चेतनमध श्रुतो भद्राऽइंद्रस्य रातयः॥ उज्जातमिंद्र ते शवऽ
उत्त्वामुत्त्वत्क्रतुं॥ भूरिगो भूरि वावृधुर्मघवन्तव शर्म्मणि भद्राऽइंद्रस्य रातयः॥
अहं च त्वं च वृत्रहन्त्संयुज्याव सनिभ्यऽआ॥ अरातीवा चिदद्रिवोनु नौ शूर
मंसते भद्राऽइंद्रस्य रातयः॥ सत्यमिद्वाऽउ तं वयमिंद्रं स्तवाम नानृतं॥ महाँ
असुन्वतो वधो भूरि ज्योतींषि सुन्वतो भद्राऽइंद्रस्य रातयः॥७१॥ स पूर्व्यो म

Indira Gandhi National
Centre for the Arts

सं॰ प॰ ५४ हानांवृजनः क्रतुभिरानजे॥यस्य द्वारा मनुष्पिता देवेषु धिय ऽआनजे॥दिवो मानं नो
त्सं दन्सोमपृष्ठासो ऽअद्रयः॥उक्था ब्रह्म च शंस्या॥स विद्वाँ ऽअङ्गिरोभ्य ऽइन्द्रो गा ऽ
अवृणोदप॥स्तुषे तदस्य पौंस्यं॥स प्रत्नथा कविवृध ऽइन्द्रो वाकस्य वक्षणिः॥शि
वो ऽअर्कस्य होमन्यस्मत्रा गन्त्ववसे॥आदू नु ते ऽअनु क्रतुं स्वाहा वरस्य यज्य
वः॥श्वात्रमर्का ऽअनूषतेन्द्र गोत्रस्य दावने॥इन्द्रे विश्वानि वीर्या कृतानि कर्त्वा
नि च॥यमर्का ऽअध्वरं विदुः॥७२॥यत्पांचजन्यया विशेन्द्रे घोषा ऽअसृक्षत॥
अस्तृणाद्बर्हणा विपो ऽर्यो मानस्य स क्षयः॥इयमु ते ऽअनुष्टुतिश्चकृषे तानि पौं
स्या॥प्रावश्चक्रस्य वर्तनिं॥अस्य वृष्णो व्योदन ऽउरु क्रमिष्ट जीवसे॥यवं न प
श्व ऽआददे॥तद्दधाना ऽअवस्यवो युष्माभिर्दक्षपितरः॥स्याम मरुत्वतो वृधे॥५५॥

बल्कु त्वियायुधा ऽऋध्वेभिः शूरनोनुमः॥जेषामेन्द्र त्वया युजा॥अस्मे रुद्रा मेह
ना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः॥यः शंसते स्तुवते धायि पज्र ऽइन्द्रज्येष्ठा ऽ
अस्माँ ऽअवन्तु देवाः॥५३॥उत्त्वा मन्दन्तु स्तोमाः कृणुष्व राधो ऽअद्रिवः॥अव ब्रह्म
द्विषो जहि॥पदा पणीँरराधसो नि बाधस्व महाँ ऽअसि॥न हि त्वा कश्चन प्रति॥त्व
मीशिषे सुतानामिन्द्र त्वमसुतानां॥त्वं राजा जनानां॥एहि प्रेहि क्षयो दिव्याघोषा
ञ्चर्षणीनां॥ओभे पृणासि रोदसी॥त्वं चित्पर्वतं गिरिं शतवन्तं सहस्रिणं॥
वि स्तोतृभ्यो रुरोजिथ॥वयमु त्वा दिवा सुते वयं नक्तं हवामहे॥अस्माकं काम
मापृण॥५४॥क्व स्य वृषभो युवा तुविग्रीवो ऽअनानतः॥ब्रह्मा कस्तं सपर्य
ति॥कस्य स्वित्सवनं वृषा जुजुष्वाँ ऽअव गच्छति॥इन्द्रं क ऽउ स्विदा चके॥कं ते दा

Indira Gandhi National
Centre for the Arts

सं॰प॰ नाऽअसक्षन्तवत्रेहन्वं सुवीर्यं ॥ उक्थेकऽ उ स्विदन्तमः ॥ अयंतेमानुषेजनेसो
५५ मः पूरुषुसूयते ॥ तस्येहि प्रऽ द्रवा पिब ॥ अयंते शर्यणावति सुषोमायामधिप्रियः ॥
आर्जीकीयेमदिन्तमः ॥ तमुग्रराधसेमहे चारुम्मदाय घृष्वये ॥ एहीमिन्द्र द्रवा पि
ब ॥ ७५ ॥ यदिन्द्र प्रागपागुदङ्न्यग्वा हूयसे नृभिः ॥ आयाहि तूयमाशुभिः ॥
यद्वा प्रस्रवणे दिवो मादयासे स्वर्णरे ॥ यद्वा समुद्रेऽ अन्धसः ॥ आ त्वा गीर्भिर्म
हामुरुं हुवे गामिव भोजसे ॥ इन्द्र सोमस्य पीतये ॥ आ तऽ इन्द्र महिमानं हरयो
देवतेमहे ॥ रथे वहन्तु बिभ्रतः ॥ इन्द्रेण पीयऽ ते स्तोषम होऽ उग्रऽ ईशानकृन्न ॥
एहि नः सुतं पिब ॥ सुतावन्तस्त्वा वयम्प्रयस्वन्तो हवामहे ॥ इदं नो बर्हिरासदे ॥ ७६ ॥
यच्चिद्धि शश्वतामसीन्द्र साधारणस्त्वं ॥ तन्त्वा वयं हवामहे ॥ इदं ते सोम्यम ५५

मध्वधुक्षन्नद्रिभिर्नरः ॥ जुषाणऽ इन्द्र तत्पिब ॥ विश्वाँऽ अर्यो विपश्चितोऽतिख्य
स्तूयमागहि ॥ अस्मे धेहि श्रवो बृहत् ॥ दानामृगषतीना राज्ञो हिरण्ययीना
म् ॥ मादेवा मघवा रिषत् ॥ सहस्रेऽ पृषतीनामधिश्चन्द्रं बृहत्पृथु ॥ शुक्रं हिरण्य
मादेदे ॥ नपीतो दुर्गहस्य मे सहस्रेण सुराधसः ॥ श्रवो देवेष्वक्रत ॥ ७७ ॥ तरोभि
र्वो विदद्वसुमिन्द्रं सबाधऽ ऊतये ॥ बृहद्गायन्तः सुतसोमेऽ अध्वरे हुवे भरं
न कारिणं ॥ न यं दुध्रा वरन्ते न स्थिरा मुरो मदे सुशिप्रमन्धसः ॥ यऽ आदृत्या श
शमानाय सुन्वते दाता जरित्रऽ उक्थ्यं यः श्रक्रो मत्सोऽ अभ्यो यो वाकीजो
हिरण्ययः ॥ सऽ ऊर्ध्वस्य रिजयत्यपावृतिमिन्द्रो गव्यस्य वृत्रहा ॥ निखातं चिद्यः
पुरुसंभृतं वसूदिद्वपति दाशुषे ॥ वज्री सुशिप्रो हर्यश्वऽ इत्करदिन्द्रः क्रत्वा

Indira Gandhi National Centre for the Arts

सं·प·
५८

यथ्याऽवशात॥ यद्वावन्थपुरुष्टुतपुराचिच्छूरनृणां॥ वयंतत्तेऽ इंद्रसंभरामसियज्ञ
मुक्थंतुरंवचः॥ ४८॥ सचासोमेषुपुरुहूतवज्रिवोमदायद्युक्षसोमपाः॥ त्वमि
द्धिब्रह्मकृतेकाम्यंवसुदेष्ठःसुन्वतेभुवः॥ वयमेनमिदाह्योपीपेमेहवज्रिणं॥
तस्माऽ उऽ अद्यसमनासुतंभरान्नूनंभूषतश्रुते॥ वृकश्चिदस्यवारणऽ उरामथि
रावयुनेषुभूषति॥ सेमंनःस्तोमंजुजुषाणऽ आगहींद्रप्रचित्रयाधिया॥ कदूनव
स्याकृतमिंद्रस्यास्तिपौंस्यं॥ केनोनुकंश्रोमतेनशुश्रुवेजनुषःपरिवृत्रहा॥ क
दूमहीरधृष्टाऽ अस्यतविषीः कदुवृत्रघ्नोऽ अस्तृतं॥ इंद्रोविश्वान्बेकनाटाँऽ
अहर्दृशऽ उतक्रत्वापणीँरभि॥ ४९॥ वयंघातेऽ अपूर्व्येन्द्रब्रह्माणिवृत्रहन्॥
पुरुतमासःपुरुहूतवज्रिवोभृतिंनप्रभरामसि॥ पूर्वीश्चिद्धित्वेतुविकूर्मि ५६

न्नाशसोहवन्तऽ इन्द्रोतयः॥ तिरश्चिदर्यःसवनावसोगहिशविष्ठश्रुधिमेहवं॥ वयं
घातेत्वेऽ इद्विन्द्रविप्राऽ अपिष्मसि॥ नहित्वदन्यःपुरुहूतकश्चनमघवन्न
स्तिमर्डिता॥ त्वंनोऽ अस्याऽ अमतेरुतक्षुधोऽभिशस्तेरवस्पृधि॥ त्वंनऽ ऊती
तवचित्रयाधियाशिक्षाशचिष्ठगातुवित्॥ सोमऽ इद्वःसुतोऽ अस्तुकलयोमा
बिभीतन॥ अपेदेषध्वस्मायतिस्वयंघैषोऽ अपायति॥ ५०॥ त्यान्नुक्षत्रियाँऽ
अवऽ आदित्यान्याचिषामहे॥ सुमृळीकाँऽ अभिष्टये॥ मित्रोनोऽ अत्यंहतिंव
रुणःपर्षदर्यमा॥ आदित्यासोयथाविदुः॥ तेषांहिचित्रमुक्थ्यंवरूथमस्ति
दाशुषे॥ आदित्यानामरंकृते॥ महिवोमहतामवोवरुणमित्रार्यमन्॥ अवां
स्यावृणीमहे॥ जीवान्नोऽ अभिधेतनादित्यासःपुराहथात्॥ कद्धस्थहव

Indira Gandhi National
Centre for the Arts

सं॰ ष॰

५७ नश्रुतः॥५१॥यद्वः श्रांताय सुन्वते वरूथमस्ति यच्छर्दिः॥तेना नो ऽअधि वोचत॥

अस्ति देवा ऽअंहो उर्व्वस्ति रत्नमनागसः॥आदित्या ऽअद्भुतैनसः॥मा नः सेतुः सि

षेदयम्महे वृणक्तु नस्परि॥इंद्र ऽइद्धि श्रुतो वशी॥मा नो मृचा रिपूणां वृजिना

नामविष्यवः देवा ऽअभि प्रमृक्षत॥उत त्वामदिते मह्यहं देव्युप ब्रुवे॥सुमृ

ळीकामभिष्टये॥५२॥पर्षि दीने गभीर ऽआं ऽउग्रपुत्रे जिघांसतः॥माकिस्तो

कस्य नो रिषत॥अनेहो न ऽउरुव्रज ऽउरूचि विप्रसर्त्तवे॥कृधि तोकाय जी

वसे॥ये मूर्द्धानः क्षितीनामदब्धासः स्वयशसः॥व्रता रक्षंते ऽअद्रुहः॥ते न

ऽआस्नो वृकाणामादित्यासो मुमोचत॥स्तेनं बद्धमिवादिते॥अपो षु ण ऽइयं ५७

शरुरादित्या ऽअप दुर्म्मतिः॥अस्मदेत्वजघ्नुषी॥५३॥शश्वद्धि वः सुदा

नव ऽआदित्या ऽऊतिभिर्व्वयं॥पुरा नूनं बुभुज्महे॥शश्वंतं हि प्रचेतसः प्रतियं

तं चिदेनसः॥देवाः कृणुथ जीवसे॥तत्सु नो नव्यं सन्यस ऽआदित्या यन्मुमोचति॥

बंधाद्बद्धमिवादिते॥नास्माकमस्ति तत्तर ऽआदित्यासो ऽअतिष्कदे॥यूयमस्म

भ्यं मृळत॥मा नो हेतिर्व्विवस्वत ऽआदित्याः कृत्रिमा शरुः॥पुरा नु जरसो वधीत॥

वि षु द्वेषो व्यंहतिमादित्यासो वि संहितं॥विष्वग्वि वृहता रपः॥५४॥ ॥इति षष्ठा

ष्टके चतुर्थोऽध्यायः॥ ॥आ त्वा रथं यथोतये सुम्नाय वर्त्तयामसि॥तुविकू

र्म्मिमृतीषहमिंद्र शविष्ठ सत्पते॥तुविशुष्म तुविक्रतो शचीवो विश्वया मते॥आ

पप्राथ महित्वना॥यस्य ते महिना महः परि ज्मायंतमीयतुः॥हस्ता वज्रं हिरण्य

यं॥विश्वानरस्य वस्पतिमनानतस्य शवसः॥एवैश्च चर्षणीनामूती हुवे

Indira Gandhi National Centre for the Arts

सं॰प॰
५८

रथानां॥अभिष्टयेसदावृधंस्वर्मीळ्हेषुयंनरः॥नानाह्वंतऽऊतये॥१॥पुरोमात्र
मृचीषममिंद्रमुग्रंसुराधसं॥ईशानंचिद्वसूनां॥तंतमिंद्रंराधसेमहऽइंद्रंचोदा
मिपीतये॥यःपूर्व्यामनुष्टुतिमीशेकृष्टीनांनृतुः॥नयस्यतेशवसानसख्य
मानंशमर्त्यः॥नकिःशवांसितेनशत्॥त्वोतासस्त्वायुजाप्सुसूर्येमहद्धनं॥
जयेमपृत्सुवज्रिवः॥तंत्वायज्ञेभिरीमहेतंगीर्भिर्गिर्वणस्तम॥इंद्रयथाचिदा
विथवाजेषुपुरुमाय्यं॥२॥यस्यतेस्वादुसख्यंस्वाद्वीप्रणीतिरद्रिवः॥यज्ञोवि
तंतसाय्यः॥उरुणस्तन्वेतनऽउरुक्षयायनस्कृधि॥उरुणोयन्धिजीवसे॥
उरुंनृभ्यऽउरुंगवऽउरुंरथायपंथां॥देववीतिंमनामहे॥उपमापड्द्वा
द्वानरःसोमस्यहर्ष्या॥तिष्ठन्तिस्वादुरातयः॥ऋज्राविंद्रोतऽआददेहरीऽ ५८

Indira Gandhi National Centre for the Arts